No. २५-६४ / क

Title शारदापञ्चाङ्गम्.

Author

Extent ५० पत्र Age सं॰ १८४२

Subject तन्त्र

[illegible]

[illegible]

[illegible]

№ 8

शा·

ट· ॐ स्वस्ति श्रीगणेशाय नमः ॐ श्रीगु
१ रवे शिवाय नमः ॐ नमो भगवत्यै शा
रदायै श्रीभैरव उवाच ॐ देवि वक्ष्ये
वयाम्नेष्टावरदोस्म्यहमग्रतः याच
स्व वरमात्मीयं ददामि सर्वसिद्धये ।
श्रीदेव्युवाच यदि देव वरो मह्यं वर
योग्यास्म्यहं यदि तदा ब्रूहि महादेव
शारदापटलं परं भैरव उवाच व
क्ष्यामि तव भक्त्याहं रहस्यं सर्वकामि
कं भोगापवर्गदं लोके गोपनीयं प्र
यत्नतः या देव देवी देवेशि शारदा च
रदापरा सरस्वतीति विख्याता शारि
लेनावतारिता पञ्चाशद्रीमहावि
द्या तत्त्वसमदशाक्षरी तयेदं सृज्यते
पं १ विश्वं तयेदं धार्यते जगत् तया संह्रि
यते चान्ते सा देवी शारदा स्मृता या दे

वीपरमाशक्तिःसैवमेपीष्टदेवता सै
वमेकास्मृताविद्यावरदात्मासरस्वती
तस्याश्चहंमन्त्रंनित्यंजपामिसततं
प्रिये तस्यायन्त्रंसमर्चामियथारयैक
वंतथा जपेनामसहस्रंचस्तुवेस्तो
त्रेणपार्वति तस्याःपंचांगमखिलंर
टामिविधिवत्सदा श्रीदेव्युवाच भ
गवन्सर्वतन्त्रज्ञभक्तानामिष्टदायक
दास्यास्मितवभक्तास्मिकीर्तितास्मिभव
ताधुना तस्याःश्रीपटलंदेवपञ्चा
ङ्गंविधिवद्विभो श्रोतुमिच्छाम्यहं
त्वत्तोदययाब्रूहिशंकर श्रीभैरवउ-
वाच पटलंपद्धतिंवर्मनाम्नांसहस्र-
कंतथा स्तोत्रंमन्त्रंचयन्त्रंपञ्चम
न्वाङ्गं:समुच्यते अथाहंपटलंवक्ष्ये
सर्वतन्त्रेषुगोपितम् रुद्रयामल

शा.
८
२
२

लितेऽस्मिन्मया देवि प्रकाशितम् । त
न्महत्पुण्यं तु देवि शिपटलं भक्तिपूर्वकं
येन श्रवणमात्रेण देवीदर्शनमिच्छ
ति । अथातो शारिकायास्तु मन्त्रोद्धारं प्र
वीम्यहम् । येन सम्यक् साधकः शीघ्र
जीवन्मुक्तो भविष्यति । अथ मन्त्रोद्धा
रः । तारं माया कामराजस्त्रशक्तिः
स्मृतं तस्माद्भगवत्येव नाम भूति
स्तस्मात्तन्चले ठद्वयं प्रयोगो क्रोमुत्र
स्तौ शारिकायै उपदः । इत्युद्धारः । प्रका
श ॐ ह्रीं क्लीं सः नमो भगवत्यै शार
दायै ह्रीं स्वाहा वर्णाः २० इति मूल
मन्त्रः नास्य विघ्नो न वा शौचं न वा
मन्त्रविपर्ययः न क्लेशो न वदौर्बल्य
न मोहोऽपि विरलानः सालात्सुम तत्र
पोयमन्त्रस्य सर्वार्थसिद्धिदः वाऽखिल

तं पुरश्चर्यास्तु दर्य्यका महेश्वरि यथो
दर्य्यसमाख्यातमेतन्मूलेन नकारये
त जीवहीनो यथा देही सर्वकर्म
सु न क्षमः पुरश्चरणहीनोयं तथम
न्त्रः फलदायकः इहैव नेशमशाने
वा शून्यागारे वनेऽथवा साधकः स्थि
हये कुर्यात्पुरश्चरणकक्रियाम् ज
पादशांशतो होमस्तद्दशांशेन तर्प
णम् पुरस्क्रियां मनोः कृत्वा मन्त्रं
कीलनमाचरेत मन्त्रसञ्जीवये
न्यस्नात्सिद्धमूलं ततो जपेत संपुटं
व पुनर्दद्यात्ततो मन्त्रोपि सिध्यति
साध्यवर्णं महादेवि दद्यान्मन्त्रान्त्यके
शिवे मन्त्रादौ दीयते नीरमिदमु
त्कीलनं परम् नामदद्यात्तथाद्यो
न्तं दद्यात्तथा वलो ———

ना

प्रा॰
र॰
३

3

सञ्जीवनो वामं मंत्रो मंत्रस्य भाषिति
ततो जपेन्मंत्रं सिद्धं साधकः सर्वसिद्धि
दे नाम्नाग्रेदीयते नीरं खड्गदाङ्गो॰
स्पयं मंत्रः पकवारं पठेद्देवि यथा॰
शास्त्राज्जपेत्ततः श्रुतिमाघष्ठसिद्धी
नामीश्वरः साधको भवेत् यंत्रोद्धारं
प्रवक्ष्यामि सर्वतंत्रेषु गोपितं मम स
र्वंस्वं मोहनं यन्त्रं सर्वापदापरिहारकम्
श्रूयं यंत्रोद्धारः मध्ये विंदुं ततो बहिस्त्रि
त्रिकोणं षट्कोणं स्याद्वृत्तं तव स्वष्टं ष
कंम वृत्ताकारं षोडशारं च वृत्तं भूगे
हं स्याच्चतुर्द्वारयन्त्रमेततत् इति यन्त्रो
द्धारः लयांगमध्यवक्ष्यामि तव श्री।
श्रावतानने यं स्म भक्ष्यकर्मविधियि वत्सा
यको भुक्तिमाप्नुयात् गणेशोयर्मरा
जश्च वरुणश्च कुबेरकः एते द्वास्थाः

अमुद्र चेत



समाख्यातास्तावत्तेन पूजयेत् त
त्रयाश्च विजया दुर्गा शाम्बरी रक्तदन्ति
का शाकंबरी च चामुण्डा शिवा च
शिवदूतिका शीतला सप्त
मातरः रतिः प्रीतिः स्थितिर्मतिः
द्युतिर्मेधा श्रद्धा पुष्टिः पूर्णा क्षमा दश देव
ताः करालो विकरालश्च संहारो रु
रुभैरवः महाकालोपि काला
ग्निरुन्मत्तः सप्त भैरवाः ह्यष्ट
दले देवि समन्त्रैरष्टभैरवाः शारि
का चण्डघण्टा राज्ञी देवि ज्वालामुखी
तथा कालिका त्रिपुरा देवि सुमु
खी परमेश्वरि एताः षट्कोणम
ध्यस्थाः स्मृताः साधकसत्तमैः भ
वानी बगला ताराः स्वजनीया स्त्रि
कोणगाः मूलेन शारदां देवीं विसे

श्या॰
८
४
५

विघ्नं सरस्वतीं पूजयेद्भक्तिभावेन ग
न्धपुष्पाक्षतादिभिः ॥ स्थूलं प्रांशुमत
ध्यापद्मपाशंकलशमेव च कूर्हस्ति
मातुभान्विन्नं पूजयेत्सायकोन्नमः
स्ववामे पूजयेद्देवि गुरुपंचकम्हरा
त स्वदेहे यमैवेशं पूजयेत्क्रम
शस्तथा ऊर्ध्वे हेरम्बराश्चैव यथा॰
वह्न्यर्पितेन मया क्रोष्टुवक्रं दयवक्रं
नतोजवक्रकं शिवे सिंहवक्रं महादे
वि पूजयेत्स्वतरश्चके शिवं रुद्रं मरुं
भीमं भैरवं परमेश्वरि विघ्नेशं पूज
येन्मन्त्री लयाङ्गमिदमुच्यते मन्त्र
स्यास्य महादेवि ऋषिर्भैरव ईरितः
छन्दस्त्रिष्टुभमाख्यातो देवता शार
दा स्मृता मायाबीजं शारशक्तिः स्वं मे
कीलकमुच्यते धर्मार्थकाममो

नार्थे विनियोगः इति स्मृतः तारा
माया स्मरा घेष्ववारैः घ ह्रूं ह्रीं भ्रौं
रिभिः करमांसमाक्रान्तहृदया
दिषडंगकम ग्रग्मरीबीजमात्रेण
कुर्याद्दिग्बन्धनं सुधीः प्रयोगान् व
दामि साधकानां हितायवै स्तंभनं
मोहनं चैव मारणाकर्षणे ततः उ
च्चाटनं वशीकारं शान्तिकं पौष्टिकं
तथा उपचारं तथैतेषां शृणुष्व सा
मिपवित्ति रवौ प्रभातवेलायां गत्वा
प्रेतगृहे शिवे भस्मना स्नान मंडलं कृ
त्वा साधकः स्तनमः मूलं जप्त्वायुतं म
न्त्री होमं कुर्याच्चितानले दशांशं सि
तपुष्पान्वयवमाषाज्जमेदुकैः गति
स्तंभमेवह्नायोम्बुद्वस्य नार्कपाद्यसं
गादिनां च मुखस्तंभकामिनां मन

श्या·
८५

सस्तथा स्तंभनम् वन्देमध्याह्न
वेलायांस्नातामृ मस्यलंक्षजेन
मूलमन्त्रं महादेवि जपेदयुतसंख्
ख्यया होमः सर्पिर्मधुसितोद्रुमाला
तीकनकादिभिः तद्भस्मनाचरेद्भा
लेतिलकं साधकोत्तमः तस्य दर्श
नमात्रेण त्रिजगन्मोहमेष्यति मो
हनम् सोमेर्धरात्रसमये गत्वा श्म
शानमण्डले पञ्चसंपूजयेत्तत्र मूले
नास्त्रंच साधकः तदग्रेव जपेन्मंत्र
मालयायुतसंख्यया वलिं निवेदयेत
त्रांसंजुहुयात्तस्य मंत्रके सर्पिर्मांव
मत्स्यमांसं तथान्नानि दशांशतः शो
धंसंभोजयेच्छ्रीं ह्रियावत्प्राणोप्यविष्ठ
ति कर्मणामनेनसावाचासस्यसंकु
लेश्वरि शत्रुःकालसमानोपि मस्तके

छत्तिनामथ्या इति मारणम् ॥ अथो
सायंसमागतस्सनदीतीरं च साधकः
स्नात्वा रहो जपेन्मन्त्रमष्टुतं दिक्समा
लया होमो हुतगृध्यादिद्वमञ्ज
कादिशुद्धिभिः नैवेद्यसहस्राह्णीणं
भवेदाकर्षणं ध्रुवम् आकर्षणम्
ग्रैनिशीथकाले तु गत्वा श्मशा
नमध्ये चितायामासनं दत्त्वा जपे
दष्टुतं समिधा होमो हुतेनमीनेश्च
कपोतान्त्रसमन्वितैः कटुतैलेन
काकानां पक्षैः कार्यविधानतः क
र्मणामनसा वाचा कारिणम्पाटयेद्ध्रु
वम् उच्चाटनम् शुक्रे वा सोमे मुहूर्ते
तु गत्वा वटतले जपेत मूलं चाष्टश
तं त्वाकं साधको मन्त्रसाधकः हो
मं कुर्याद्यदाच्चपाय मधुगोधूममद्भू

शा॰
ट॰
८
6

गिकैः रजस्वलां वैरङ्कैः —— ङ्कोपु॰
ष्पैर्हूयेद्वारि साधकस्ततो देवि त्रै।
लोक्यं वशमेष्यति वशीकरणम्
शान्तो रात्रिमुखे देवि शून्ये वा वनभू
मिषु जपेन्मन्त्रायुतं देवि होमये
त्सर्पिषा सितान्नम् नारिकेलचषा।
मात्स्यमीनकण्टकसंयुतम् व
ह्निरात्रौ दीपीकृत्य नाम तिह्रष्टिभय।
स्य च मारीदुर्भिक्षभीतीनां स्वयः।
शान्तिर्भविष्यति शान्तिकम् सर्व
वारे च सर्वत्र पौष्टिकं साधकस्त्वरे
त् शुभेह्नि शुभनक्षत्रे शुद्धे जसायु
तमनुत्तम सर्गाण्याज्यह्वियुतैः कार्यः
साधकैः सर्वसाधकैः देवीनां देव
तानां च महापुष्टिः प्रजायते पौष्टि
कम् सर्पिर्यवादिगोमूत्रानेकटु॰

मादिभिः शिवे होमो दशांशतः कार्यः
साधकैः सर्वसिद्धये । इतीदं पटा
लं देवि शारदाया मयास्मृतम गुह्यं
गोप्यं न दातव्यं भक्तिहीनाय पार्वति
कुलीनाय वशान्ताय गुरुभक्तिरता
य च दद्यात्सद्यो भवेत्सिद्धिरमत्रसि
द्धिहानिदा शारदापटलं दिव्यं गोप
नीयं विशेषतः सर्वस्वा गोपयेद्यः
त्नादिमानापारमेश्वरी ॥
इति श्रीरुद्रयामले तन्त्रे महारहस्ये
सर्वविद्याप्रजासंग्रहे शारदापटलं
संपूर्णम् शुभमम ॥

पृा· ५८

२

7

ॐ अस्य श्रीशिवमंत्रस्य श्रीभैरव
ऋषिः गायत्रश्छंदः श्रीशारदाप
तिशिवोदेवता ह्रींबीजं ह्रांशक्तिः
नमः कीलकं श्रीशिवप्रीत्यर्थे ज
पेविनियोगः एवं न्यासः ह्रांह्रीं
ह्रूंह्रैंह्रौंह्रः ॐ उद्यत्सूर्यसहस्रभा
स्वरमुकुटंविकटश्शेखरमर्द्धपिंगारक्त
नेत्रान्तंफणिफणालंकारहारोज्ज्व
लंस्मेरास्यप्रांशुशिवलक्ष्मौलिमम:
याविद्धकपालवरंमूलंचापवरंद
यानमनिशंदोर्भिर्भजेहंशिवम्
ॐ ह्रीं ह्रां शिवाय नमः ॥

२

शा. ॐ श्रीगणेशाय नमः श्रीदेव्युवाच
प. भगवन्करुणांभोधे जगतां हितका
१ म्यया भूयोपि स्त्रीस्वभावेन
परिपृच्छामि धूर्जटे शारदायन्त्र
राजस्य कीदृश्यं वै न पद्धतिः श्रीत्रि
विक्रतेनोक्तं हृदि यद्यस्ति मयि तद्
या भैरव उवाच शृणु पार्वति व
क्ष्यामि पद्धतिं गद्यरूपिणीम् यस्याः
श्रवणमात्रेण कोटियज्ञफलं ल
भेत ब्राह्मिमुहूर्ते उत्थाय स्वशिरः
स्थ सहस्रारायोश्वेतकमलपी
ठकेसरकर्णिकान्तर्गतं निजगु
रुं श्वेतवर्णं श्वेतालंकारालंकृतं
रक्ता स्वशक्त्या श्वेतांवरभूषितया वा-
मांगे सहितं ध्यात्वा मानसैरुप
चारैः संपूज्य दण्डवत्प्रणामेत् प्र

खण्डमण्डलाकारंव्याप्तंयेनचरा
चरं तत्पदंदर्शितंयेनतस्मैश्रीगुर
वेनमः इत्यादिभिर्नत्वातदाज्ञां
गृहीत्वाबहिर्गत्वामलमूत्रादिवि
सर्जनंकृत्वाशौचमाचरेत ततः
नदीकूलंगत्वामुकूर्चंद्वादशांगुल
दन्तधावनंतस्य ऊशक्तिबीजे
नगण्डूषषट्कंविधायप्रणवेनमु
खं प्रक्षाल्य ॐ ह्रीं मणिधरि व
ज्रिणि हूं शिखोपरि मोरे ठः ठः ठः
कटितिशिखामाबध्यमूलेनति
राचम्यमूलेनप्राणायामत्रयंकृ
त्वावासांस्याक्तछमलापकर्षण
स्नानंविधायमन्त्रस्नानंचरेत त
तोमूलेनमृदमानीयजलंप्रोद्धृदये
त ततोमूलेनजलेञ्जलिंबद्धा

प्रा॰
प॰ संप्रोक्ष्य मन्त्रेण शोधयेत् ततो मन्त्रवि
२ भागं कृत्वा षट्षट्कं षट्कं शोधये
2 त् ततो जले मूलं त्रिभागमस्त्रं या
तीर्थान्यावाहयेत् ॐ गङ्गे च यमु
ने चैव गोदावरि सरस्वति नर्मदे
सिन्धु कावेरि जलेस्मिन्संनिधिं
कुरु इति तीर्थान्यावाह्य ॥ ततो त्रि
नीयां मन्त्रेस्ले धृत्वा देवतां सशिवां
मूलेनावाहयेत् शारदे वरदे मात
मातृका हारभूषिते परिवारयुते
जले॰^ देवि घटेस्मिन्संनिधिं कुर्वि पञ्चकु
शाकुद्द्या जले मूलेन यन्त्रं विभाव्य
तत्र देवतामावाहन तृतीयां मन्त्रेदा
शिरसः पादपर्यन्तं सलिलमनया
मवतीर्य मूलेन त्रिरुन्मज्जेत् तत्र
श्रीघटं गविधाय देवतां ध्यात्वा मू

लमष्टोत्तरशतं जप्त्वा मूलेन शिरसो
मार्जनं विधाय ॐ ह्रीं हंसः श्रीसू
र्याय पृष्ठे त्रयोन्नमः इति सूर्याया
र्घ्यत्रयं दत्त्वा जलादेव कृत्य वामे
परिधाय पात्रस्थं चोरेत् तत्र मूलेन
शिरसि कुम्भमुद्रया वारत्रयं जला
ञ्जलिं दद्यादेवमेव ॐ ह्रीं आत्मत
त्त्वं शोधयामि स्वाहा ॐ ह्रीं विद्या
तत्त्वं शोधयामि स्वाहा ॐ ह्रीं शिव
[illegible]तत्त्वं शोधयामि स्वाहा इत्या
चम्य प्रणवेन प्राणायामत्रयं चरे
त् पूरकं १६ कुम्भकं ६४ रेचकं ३२
इत्येवं विधाय षडङ्गं कुर्यात् ॐ ह्रां
ह्रां हृदयाय नमः ॐ ह्रीं ॐ ह्रीं क्लीं
शिरसे स्वाहा ॐ ह्रूं क्लूं शिखायै वौ
षट् ॐ ह्रैं क्लैं नेत्रेभ्यो वौषट् ॐ

शा॰
प॰
३

क्रः अस्त्राय फट् इति षडंगं विधाय
तुलकेन जलमादाय दक्षहस्तेना
च्छाद्य हं यं वं रं लं इति त्रिरभिमन्त्र्य मू
3
लमुच्चरंस्तदुद्गलितोदकबिन्दुभिस्त
त्त्वमुद्रया सप्तधा मूर्ध्नि अभ्युक्षणं कृ
त्वा शेषजलं दक्षहस्तेन समादाय ते
जोरूपं ध्यात्वा इडया देहान्तः सम्यक्प्र
क्षाल्य कृष्णवर्णं तज्जलं पापरूपं पिं
२१
गलया विनिःसृत्य पुरः कल्पितवज्र
शिलायां वामे फडिति निक्षिपेत् ॥
सौद्य सूर्यार्घं कृत्वा पूर्ववदाचम्य ज
लेयन्त्रं ध्यात्वा स्नावरणं देवतां ध्या
त्वा पूर्ववत्संध्यांगं कृत्वा मूलं जपेत्
ततो गायत्रीं जपेत् ॐ शारदायै वि
द्महे सकलदशनायै धीमहि तन्नः सर
स्वती प्रचोदयात् ॥ इति पश्चाच्छाक्ता

नमो गायत्र्यै देव्यै श्रद्धायै त्र्यंघ दद्यात् इ
ति देवदेव्यो राद्ध्यं दत्त्वा पश्चात् श्री
मत्सुकानन्दनाथभैरवरूपं तम
मध्यादकेन सशक्तिकं तर्पयेत् श्री
गुरवे श्रीपरमगुरुं ममुकानन्दनाथं त
र्पयेत् आयामां परमेष्ठिगुरुं मत्सु
कानन्दनाथं तर्पयेत् इति सकृद्दिव्यो
घसिद्धौघमानवौघगान् गुरून् सन्त
र्प्य देवीं सन्तर्पयेत् जलेन त्रिभाग्य
श्रीमूलेन शारदां सरस्वतीं सपरिवारां त
र्पयामि नमः इति सन्तर्पयामन्त्रं मू
लेशान्तिं लिप्तं तर्पयामि नमः मूलशा
रदां सायुधं परिवारवाहनं महादे
वमद्दिनां तर्पयामि नमः शिवलोकाया
मिति सन्तर्प्य पुनः ॐ ह्रीं हूं सः श्री
मार्तण्डभैरवाय पप्रथनेश्वर्यो नमः

प्रा॰
प॰
४

५

इमर्घ्यं दत्वा मूलेनपितं तर्पयेत्
ततो भूयो यथाशक्त्या गायत्रीं जपेत्
महापातकयुक्तोपि प्रजपेद्दशधा।
यदा पापान्मुक्तिं शिवे प्राप्यतेनोद
गीपुरं व्रजेत् इति मूलेन मनसा स
शिवां देवीं हृदि विसृज्य यागगेह
मागच्छेदिति सन्ध्याविधिः ॥ त
तो गृहमागत्य पादौ प्रक्षाल्य द्वारदेवताः
पूजयेत् ग्लौं श्रीगंगणेशाय नमः
पूर्वे क्षां क्षेत्रपालाय नमो दक्षिणे
वीं वटुकाय नमः उत्तरे गं गंगायै
नमः ऊर्ध्वे यं यमुनायै नमः अध
स्तात् सं सरस्वत्यै नमः पश्चिमे
मूलदेवतायै नमः मध्ये इति स
पुष्पहस्तान्तः प्रविश्य यथा हेमा
सनं शोधयेत् ॐ अस्य श्रीआस

नशुद्धिमन्त्रस्य मेरुपृष्ठऋषिः कूर्मो
देवता। सुतलंछन्दः आसनोपवेश शोधने
ने विनियोगः श्रीपृथ्व्यै नमः पृ
थ्वि त्वया धृता लोका देवि विष्णु
ना धृता त्वं च धारय मां देवि पवित्र
कुरु चासनं ॐ ह्रीं क्लीं श्रीं अनन्ताय
नमः ॐ ह्रीं क्लीं क्लूं कूर्माय नमः
मूल आधारशक्ति सहस्रारविन्द
मकरन्दराञ्जितकर्णिकायै नमः १
समुद्ररत्नाय नमः २ संसारसौ
नमः इति संपूज्य प्रणम्य मूलम्
अपसर्पन्तु ते भूता ये भूता भुवि
संस्थिताः ये भूता विघ्नकर्तारस्ते
नश्यन्तु शिवाज्ञयेति तालत्रयं द
त्त्वा वामपार्ष्णिघातत्रयं दत्त्वा
विघ्नान्भूतांश्च निःसार्य नाराचमु

श्रा॰ प॰ ५

ङ्गं प्रदर्शयेदिमामनेन शोध्य प्रथमतो
मूलेन देवीं सशिवां ध्यात्वा पूर्ववदा
वाह्य पूर्ववत्प्राणायामत्रयं कुर्यात्
पूरकं १२ कुंभकं १६ रेचकं ३२ रे
मेवं विधाय षडंगं कृत्वा प्राणायाम
योगेन भूतशुद्धिं कुर्यात् ॐ हूमित्या
कुंडल्या सुषुम्णावर्त्मना प्रदीपक
लिकाकारं ब्रह्मपथान्तर्नीत्वा तेजः
सदाशिवे समानीय शोषयेद्वायुबी
जेनेति षोडशयाजमेन धूम्रवर्णेन च
त्रिकोणेन पापिनं वामकुक्षिगतं
शोषयेत् रं वह्निबीजेनेति द्वादश
याजमेन रक्तवर्णेन त्रिकोणेन दा
हयेत् लं इन्द्रबीजेनेति दशयाजमे
न पीतवर्णेन षट्कोणेन गलदमृ
तेन प्लाविगतकल्मषं दिव्यदेहं वि

भागमप्राणप्रतिष्ठां चरेदिति भूतशुद्धिः
ॐ सोहं हंसः मम प्राणा इह प्राणाः इह
प्राणा मम जीव इह स्थितः मम सर्वे
न्द्रियाणि वाङ्मनश्चक्षुःश्रोत्रजिह्वा
घ्राणप्राणा इहैवागत्य सुखं चिरं तिष्ठ
न्तु स्वाहा इति प्राणप्रतिष्ठा । ततो मा
समस्त्वर्वकं संकल्पं कुर्यात् अस्य श्रीशा
रदायन्त्रराजपूजामंत्रस्य भैरवऋषिः
त्रिष्टुप्छन्दः श्रीशारदाभगवती देवता
ह्रीं बीजम् सौः शक्तिः नमः कीलकं
श्रीधर्मार्थकाममोक्षार्थे शारदाय
न्त्रपूजायां विनियोगः अथ न्यासः
श्रीभैरवऋषये नमः शिरसि त्रि
ष्टुप्छन्दसे नमः मुखे शारदादेवतायै
नमः हृदि ह्रीं बीजाय नमः नाभौ
सौः शक्तये नमः गुह्ये नमः कीलका

श्या॰
प॰
९

यनमः पादयोः धर्मार्थकाममोक्षा
र्थे विनियोग इति सर्वांगे ॥ इति ऋ
ष्यादिन्यासः अथ मूलन्यासः ॐ ह्रां
क्लां हृदयाय नमः ॐ ह्रीं क्लीं शिरसे
स्वाहा ॐ ह्रूं क्लूं शिखायै वषट् ॐ ह्रैं
क्लैं कवचाय हुम् ॐ ह्रौं क्लौं नेत्रेभ्यो
वौषट् ॐ ह्रः क्लः अस्त्राय फट् इति
हृदयादिषडंगन्यासः ॐ ह्रां क्लां अंगु
ष्ठाभ्यां नमः ॐ ह्रीं क्लीं तर्जनीभ्यां नमः
ॐ ह्रूं क्लूं मध्यमाभ्यां नमः ॐ ह्रैं क्लैं
अनामिकाभ्यां नमः ॐ ह्रौं क्लौं क
निष्ठिकाभ्यां नमः ॐ ह्रः क्लः कर
तलकरपृष्ठाभ्यां नमः इति करन्या
सः अथ पीठन्यासः ॐ ह्रीं श्रीं काम
रूपपीठाय नमः हृदि ॐ ह्रीं श्रीं
जालन्धरपीठाय नमः शिरसि इ

ॐ ह्रूं त्रिशिरपीठाय नमः शिखाया
म् ३ उड्डीयानपीठाय नमः कवचे २
वाराणसीपीठाय नमः नेत्रयोः २
शारदापीठाय नमः अस्त्रे इति
पीठन्यासः अथ षडङ्गमातृकान्यासः
अं कं खं गं घं ङं आं हृदयाय नमः इं
चं छं जं झं ञं ईं शिरसे स्वाहा उं टं ठं डं
ढं णं ऊं शिखायै वषट् एं तं थं दं धं
नं ऐं कवचाय हुम् ओं पं फं बं भं मं
औं नेत्रत्रयाय वौषट् अं यं रं लं वं शं
षं सं हं क्षं अः अस्त्राय फट् इति हृदा
दि षडङ्गन्यासः एवं करन्यासः इति
षडङ्गमातृकान्यासः अं नमः शिर
सि आं नमः मुखे इं नमः दक्षनेत्रे
ईं नमः वामे उं नमः दक्षकर्णे ऊं
नमः वामे ऋं नमः दक्षनासापुटे

अं नमः वामे ऌं नमः दक्षगण्डे ॡं
नमः वामे एं नमः ऊर्ध्वोष्ठे ऐं नमः
अधरोष्ठे ओं नमः ऊर्ध्वदन्तपङ्क्तौ औं
नमः अधोदन्तपङ्क्तौ अं नमः शिर
सि अः नमः आस्ये कं नमः दक्षबा
हुमूले खं नमः कूर्परे गं नमः मणि
बन्धे घं नमः अङ्गुलिमूले ङं नमः
अङ्गुल्यग्रे चं नमः वामबाहुमूले
छं नमः कूर्परे जं नमः मणिबन्धे
झं नमः अङ्गुलिमूले ञं नमः अङ्गु
ल्यग्रे टं नमः दक्षपादमूले ठं नमः
जानुनि डं नमः गुल्फे ढं नमः अ
ङ्गुलिमूले णं नमः अङ्गुल्यग्रे तं न
मः वामपादमूले थं नमः जानुनि
दं नमः गुल्फे धं नमः अङ्गुलिमूले
नं नमः अङ्गुल्यग्रे पं नमः दक्षपार्श्वे

फं नमः वामे वं नमः पृष्ठे भं नमः ना
भौ मं नमः जठरे यं नमः हृदि रं न
मः दक्षांसे लं नमः वामे वं नमः क
कुदि शं नमः हृदादि दक्षहस्ताग्रा
न्ते षं नमः हृदादि वामहस्ताग्रान्ते
सं नमः हृदादि दक्षहस्तपादाग्रान्ते
हं नमः हृदादि वामपादाग्रान्ते लं
नमः पादादि शिरःपर्यन्तं क्षं नमः
शिरसः पादपर्यन्तमिति व्यापयेत्
इति मातृकान्यासः अथ तत्त्वन्यासः
ॐ आत्मतत्त्वाय नमः हृदि ह्रीं वि
द्यातत्त्वाय नमः शिरसि क्लीं शिवत
त्त्वाय नमः शिखायां ॐ शिवत
त्त्वाय नमः कवचे ह्रीं शक्तितत्त्वा
य नमः नेत्रयोः क्लीं शिवशक्तित
त्त्वाय नमः अस्त्रे इति हृदादि षडंग

श्या.
प.
८

न्यासः एवं करन्यासः षडङ्गमन्त्रात
न्यासः ॐ नमः शिरसि ह्रीं नमो मु
खे क्लीं नमो हृदये सं नमः नाभौ
नं नमः पृष्ठे मों नमः शिश्ने अं नमो
मो गुह्ये गं नमः कट्वाम वं नमः
घं जानुनि मैं नमः जङ्घयोः शं नमः
गुल्फयोः वं नमः पादयोः दां नमः
शिरसः पादपर्यन्तं यैं नमः पादा
मूर्ध दिपर्यन्तम् ह्रीं नमो मूर्धनि
स्वां नमः श्रुते ह्रां नमः सर्वाङ्गेषु इ
ति मूलमन्त्रन्यासः एवं न्यासं विधा
य पूर्ववदाचम्य प्राणायामत्रयं
कृत्वा गुरुं ध्यायेत् अज्ञानतिमि
रान्धस्य ज्ञानाञ्जनशलाकया
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे
नमः इति ध्यात्वा देवीं शिवां ध्या

येन । उद्यद्बालार्कबिंबद्युतिमनल
शिखाकोटितेजस्विनीं तां भास्वद्र
त्नाग्निनेत्रां विविधमणिशिखोर
शिमभास्वत्किरीटाम् । नानालंकी
वमायामदनविलसितांशक्तिवा
लौकरूपां वन्देसिंहासनस्थां प्रह
सितवदनां शारदां षड्भुजाढ्या
म् इति ध्यात्वा मूलमष्टोत्तरशतं
जप्त्वा देवदेवेशः समर्च्य श्रीचक्रेम
न्त्राविभावप्रसादप्रवालवाविलिख
पूजयेत् । अरुणार्कनिभां त्रिलो
चनां कमलपत्रविशालधारिणीं
म् कलशशूलकपालषड्भुजां
ललितदेवीमनिशं भजे महे । इति
ध्यात्वा मानसैरुपचारैः संपूज्य ब
हिः श्रीचक्रे वक्ष्यमाणोपचारै

शा॰
प॰
८
9

कुर्वष्टदलालंकृतं मध्ये षट्को-
णांकितं त्रिकोणं बिन्दुमण्डलं कवि
विन्यस्य पीठपूजां कुर्यात् ॐ फ्रों ह्रीं
मण्डूकाय नमः २ कालाग्निरुद्रा
य नमः २ मूलप्रकृत्यै नमः २ आ
धारशक्त्यै नमः २ कूर्माय नमः २
अनन्ताय नमः २ वराहाय नमः २
पृथिव्यै नमः २ रत्नपद्मपरिसंस्थ-
ग्र २ स्वर्णपर्णिकाय नमः मध्ये २
नवरत्नविराजितनवरत्नखण्ड
मयद्वीपाय नमः २ पद्मरागख
ण्डाय नमः २ स्वर्णगिरये नमः २
नन्दनोद्यानाय नमः २ कल्पवा-
नाय नमः २ पद्मवनाय नमः २
विचित्ररत्नखचितभूमिकायै न
मः २ चिन्तामणिमण्डपाय नमः २

नवरत्नखचितरत्नमयवेदिकायै न
मः २ रत्नसिंहासनाय नमः तन्म
ध्ये २ सहस्रारपद्माय नमः २ प्र
कृतिमयकेसरेभ्यो नमः २ वि
कृतिमयपत्रेभ्यो नमः २ तन्मध्ये
स्मदशाबीजभूषितकर्णिकायै
नमः तत्पार्श्वे २ धर्माय नमः २
ज्ञानाय नमः २ वैराग्याय नमः २
ऐश्वर्याय नमः वामतः २ अधर्मा
य नमः २ अज्ञानाय नमः २ अवैरा
ग्याय नमः २ अनैश्वर्याय नमः २
तिसत्वमध्ये २ सं सत्वाय नमः २
रं रजसे नमः २ तं तमसे नमः २ ॐ
ह्रीं क्लिं इति मूलमुच्चार्य श्रीचक्रे पु
ष्पाञ्जलित्रयं दत्वा श्रीचक्रे योगपी
ठपदिकल्पपात्रस्थापनं कुर्यात्

शा.
प.
१०

10

इतियोगपीठपूजा तत्रस्ववामेत्रिको
णंवृत्तचतुरस्रंमण्डलंविधायमूल
मुच्चार्यश्रीशारदासामान्यार्घ्यमंड
लायनमः ॐनमःत्रिकोणाग्रे ह्रीं
नमःदक्षे क्लिंनमःवामे तत्रवृत्त
मुखे ॐनमःईशाने ह्रींनमःआग्ने
ये क्लिंनमोनैऋते ॐनमोवाय
व्ये ह्रींनमोमध्ये क्लिंनमःसर्वदि
क्षु इतिषडंगान्तैःसंपूज्य तत्रमण्ड
लेअस्त्रायफडितित्रिपादिकांप्रक्षा
ल्यसंस्थाप्य अंअग्निमण्डलायदश
कलात्मनेनमइतितत्राम्बुनालित
पात्रंविसंस्थाप्य शंरवे रं अर्कमण्ड
लायद्वादशकलात्मनेनमइत्यभ्य
र्च्यमूलमुच्चार्यविलोममातृकया
संपूर्यसौःसोममण्डलायषोडशा

कलात्मने नमः इति संपूज्य मूलाष्ट
मिमंत्रितं कृत्वा गंगे च यमुने चैव
गोदावरि सरस्वति नर्मदे सिंधु का
वेरि जलेस्मिन्सन्निधिं कुरु इति ती
र्थमावाह्य स्तुं भावयेदिति सामा
न्यार्घ्यविधिः अथ कलशस्थापनं
सामान्यार्घ्यस्य वामे त्रिकोणषट्
कोणवृत्तचतुरस्रमण्डलं कृत्वा
तन्मण्डलं मूलेनाभ्यर्च्य मूलमुच्चा
र्य श्रीशारदाकलशमण्डलाय नमः
ततः पूर्ववन्मूलेन मण्डलमभ्यर्च्य
तत्रास्त्रक्षालितां त्रिपादिकां संस्था
प्य रं वह्निमण्डलाय दशकलात्मने
नमः इत्यभ्यर्च्य तत्रास्त्रक्षालितं कल
शं संस्थाप्य अं अर्कमण्डलाय द्वा
दशकलात्मने नमः इत्यक्षतपुष्पै

रभ्यर्च्य तत्रानामिकांगुष्ठकरामृत
धारामातेन कलशमापूर्य सौः सौ
ममृतेलायघोरुपकलात्मने नमः
तत्राभ्यर्च्य क्लां क्लीं क्लूं क्लैं क्लौं क्लः
अमृते अमृतोद्भवे अमृतवर्षिणि
अमृतं स्रावय स्रावय छुं क्रं पाप
मोचय मोचय ॐ ह्रीं क्लिं ह्सौः ऐं देवि
वषट् इति सप्तधाभिमन्त्र्य ह्रीं क्लीं
ॐ ह्सक्षमलवरयूं आनन्दभैरवा
य वौषट् ॐ ह्रीं क्लीं आनन्दभैरवसु
रादेवीपादुकाभ्यो नमः समभ्यर्च्य
धेनुयोनिमुद्रे प्रदर्श्यामृतस्मुद्रया
च्छादयेत् इति कलशसंस्थापन
मामामार्च्य सद्धेतु कलशवन्मागु
लेकलशवसात्र कलशवन्मागु
लवत्तद्भ्यर्च्य कृत्वा शेषवत्सर्जयेत्

तत्र प्रोक्षणीपात्रं गुरुपात्रमर्घः पा-
द्याकारेण तत्र पाद्याचमनीयपात्राणि
संस्थाप्य पूजयेत् तत्र वर्द्धकपात्रं
शंखोदकं ततो संस्थाप्य मूलेन पूजये-
दिति पात्रस्थापनविधिः तत्र मूले-
नानन्दभैरवांकोपविष्टां देवीं ध्यात्वा
मूलेन पाद्यार्घाचमनीयादि परि-
कल्पयेत् मूलं देवदेव्यो मधुपर्का-
चमनीयादि कल्पयेत् ततो मूलं स्ना-
नं तैलाभ्यंग तीर्थस्नानादि विधाय
सर्वालंकारैरलंकृत्य श्रीचक्रे मन-
सा विभाव्य पूजयेत् ॐ ह्रीं क्लीं गं
गन्धाक्षतपुष्पेभ्यो नमः २ जगत्तु-
निमयमानर्घ्यादायेन मः मूलं धू-
पदीपादि निवेदयेत् मूलं नैवेद्य
निवेद्य मूलं गण्डूषजलं निवेद्य मू-

ॐ नमो श्री ... नमस्तुभ्यं सुरासुरनमस्कृत ।
... अनुज्ञां देहि मे श्रीचक्र पदिकासावनाय मे ॥

शा. प १२

12

लंतां हृल्लादि समर्पयेत् ततो मूलेन
ह्रां विद्याय ॐ ह्रीं हृदयाय नमः ह्रीं शि
रसे स्वाहा ह्रूं शिखायै वषट् ॐ
कवचाय हुं ह्रौं नेत्रेभ्यो वषट् ।
ह्रः अस्त्राय फट् इति षडंगं कृत्वा
चक्रं संपूजयेत् ॐ ह्रीं ह्रूं सर्वसि
द्धिप्रदाय चक्राय नमः इति पुष्पां
जलिं दत्वा ॐ श्रीं ह्रीं गं गणेशा
य नमः २ धं धर्मराजाय नमः २ वं
वरुणाय नमः २ कुं कुबेराय नमः
इति गन्धादौ तैर्दत्वावर्तनाभ्यर्च्य
प्रथमावरणम् ॐ ह्रीं ह्रूं जया
यै नमः २ विजयायै नमः २ उग्रा
यै नमः २ शांवर्यै नमः २ रक्तदंति
कायै नमः २ शाकंवर्यै नमः २
चामुण्डायै नमः २ शिवायै नमः २

अभीष्टसि
द्धिं मे देहि
शरणागतव
त्सले भक्त्या
समर्पये तुभ्यं
प्रथमावरणार्चनम् ॥ ... मुद्रया पुष्पाञ्जलिं ...

शिवदूतिकायै नमः २ शीतलायै
नमः २ स्वप्रभायै नमः २ श्रा
तायै नमः २ रसै नमः २ श्रीसै न
मः २ स्थिसै नमः २ मसै नमः २
इति गन्धादिभिर्मातृवर्तेनाभ्यर्च्य
द्वितीयावरणम् ॐ ह्रीं ह्लिं कराला
य नमः २ विकरालाय नमः २
महाराय नमः २ रुरुभैरवाय न
मः २ महाकालाय नमः २ का
लाग्निरुद्राय नमः २ उन्मत्तभैरवा
य नमः २ सर्वभैरवाय नमः २ इ
ति गन्धादिभिर्देवतावर्तेनाभ्यर्च्य तृ
तीयावरणम् ॐ ह्रीं ह्लिं सर्वसंमो
हनाय वकाय नमः इति पुष्पांजलिं
दद्यात् ॐ ह्रीं ह्लिं शारिकायै नमः २
राज्ञ्यै नमः २ ज्वालामुख्यै नमः २

पू.
प.
१२

कालिकायै नमः २ त्रिपुरायै नमः ३
इति गन्धादिभिरभ्यर्च्य चतुर्थावर-
णं १ भवान्यै नमः २ वगलायै नमः ३
(तारायै) धूम्रायै नमः इति त्रिकोणे सम्पूज्य
पंचमावरणम् ॐ ह्रीं क्लिं सर्वा-
शापूरकाय चक्राय नमः इति पु-
(विजयेश्वर) ष्पांजलिं दत्वा मूलमुच्चार्य श्री
आनन्द भैरवसहितायै परदेवतायै
नमः इति सम्पूज्योच्चार्य मूलं सर-
स्वत्यै नमः इति विन्द्वौ इति षष्ठाव-
रणम् १ शूलाय नमः २ प्रासा-
य नमः ३ पद्माय नमः ३ पाशा-
य नमः ३ कलशाय नमः ३ ख-
ड्गाय नमः ३ इति गन्धादिभिरुप-
र्युपरि सम्पूज्य सप्तमावरणम्
स्वर्गामेरवोत्रयं विजयमूलेन

संपूज्य २ गुरुभ्यो नमः २ परम
गुरुभ्यो नमः २ परापरगुरुभ्यो न
मः इति गन्धाक्षतैरभ्यर्च्य स्वदे
हे देवोत्रपद्मं मूलेनाभ्यर्च्य २
धर्माय नमः २ ज्ञानाय नमः २
वैराग्याय नमः २ ऐश्वर्याय नमः
इति गन्धाक्षतैः संपूज्य ऊर्ध्ववक्त्र
ं संपूज्य २ हयवक्त्राय नमः २
क्रोडवक्त्राय नमः २ अजवक्त्रा
य नमः २ सिंहवक्त्राय नमः इति
गन्धाक्षतैः संपूज्य मूल शिवा
य नमः २ रुद्राय नमः २ मृडाय
नमः २ भीमाय नमः २ भैरवा
य नमः २ इति गन्धाक्षतैरुपष्ठि
परि संपूज्य विन्दौ अमृतमावरा
णम् ततो देवमग्रे मांसं विधाय

संकल्पं एवं षडंगं कृत्वा देवीं ध्या
त्वा जपं विधिवद्विधाय देवदेव्या ज
पसमर्प्यं कवचसहस्रनामस्तव
पाठसमर्प्यं ॐ ह्रीं क्लीं गुह्यातिगु
ह्यगोप्त्री त्वं गृहाणास्मत्कृतं जप
म् सिद्धिर्भवतु मे देवि त्वत्प्रसादा
न्महेश्वरि इति देवदेव्या जपसम
र्प्यं मूलेन नैवेद्यं चाचमनीयं तांबू
लादीन्समर्प्पयेत् मूलं ह्रां देत्रपा
लबटुकभैरवकपिलजटाभार॰
भास्वत्त्रिनेत्रज्वालामुख इमं ब
लिं गृह्ण गृह्ण गृह्ण स्वाहा मूलं
यां यं यूं योगिनीभ्यो नमः स्वाहा
मूलं सौः सर्वविघ्नकृद्भ्यो भूतेभ्यः
स्वाहा इति बलिं मूलेन विसर्ज्य
प्रातः प्रभृति सायान्तं सायादि प्रा

नरन्तनः यत्करोमिजगद्योनेत
दस्तुतवपूजनम् इतिदत्त्वाचम
त्कापुष्पमूलेनपुष्पाञ्जलिंदत्वा
देवीं सशिवां हृदि विसृज्य स्वय
मपि सदाशिवो भूत्वा सुखं विहरे
दितिशिवम् इतिनित्यकर्म इती
मां शारदापद्धतिं रहस्याचारगर्भि
णीं यद्रूपां सदा गुप्तां गोपयेत्प
रमेश्वरि इतिश्रीरुद्रयामले तंत्रे
समस्तविद्यारहस्यासंग्रहे शारदार्चन
पद्धतिः समाप्तामितिशुभम्

15

शा॰
क॰
१

ॐ श्रीगणेशाय नमः ॐ नमः शार-
दायै श्रीदेव्युवाच ॐ भगवन्देवदे-
वेश भक्तानुग्रहकाम्यया कवचं
शारदायास्त्वं वद श्रीश जगत्पते
भैरव उवाच रहस्यमेतदखिलं कव-
चं मन्त्रविग्रहम् जगन्मङ्गलनामानं
शारदाया रहस्यकम् वक्ष्ये तवेष्ट-
सिद्ध्यर्थं कवचं देवदुर्लभम् शा-
रदाकवचस्यास्य ऋषिर्भैरव उच्यते
त्रिष्टुप्छन्दस्समाख्यातो देवता शा-
रदेरिता लज्जाबीजं परा शक्तिः
स्वाहा कीलकमुच्यते श्रुतिमा-
यशःपुष्टिसिद्धीनां सिद्ध्यर्थे विनियोग-
कः ॐ अस्य श्रीशारदाजगन्मङ्ग-
लकवचस्य भैरव ऋषिः त्रिष्टु-
प्छन्दः श्रीशारदादेवता ह्रीं बी-

ॐ ह्सः शक्तिः स्वाहा कीलकम् श्री
श्रीमायाबहुसिद्ध्यर्थं श्रीशारदाकवचः
चपाठे धारणे च विनियोगः ॐ ह्रीं
क्लीं ह्सः शिरः पातु शारदा शूलधा
रिणी ॐ ह्रीं पायाल्ललाटं मे देवी
नीलसरस्वती ॐ श्रीं नेत्रे सदा पा
याद्देवी नीलपताकिनी ॐ क्लीं श्रु
तीमदीये मा देवी प्रेतासना सदा
ॐ ह्सः घ्राणे सदा पातु देवी पद्मा
या मम ॐ क्लीं नासां सदा मा ने
देवी शंकरवल्लभा ॐ ह्रीं मायायाः
ग्लुं वनिर्मे देवी सरस्वती मम ॐ
ह्रूं ममस्कायुरौ पातु देवी कलशधा
रिणी ॐ ह्स्रूं जिह्वां सदा पातु दे
वी मंत्रमयी मम ॐ ह्सौः मे [illegible]ग
लं पातु देवी कूर्चाख्यया सदा ॐ ऐं

शा·
क·
२

2

स्कन्दौ महापातदेवी मे चण्डविक्र
मा ॐ सौः भुजौ मम मातृकात्मा देवी·
पाशायुधधरा ॐ क्लीं स्तनौ महा
पातदेवी त्रैलोक्यसुन्दरी ॐ ह्रां
वक्षो वतात्रिमे देवी पद्मासना मम
ॐ ह्लौं कक्षौ महापातदेवी त्रिपुर
मालिनी ॐ पं क्लीं हृदयं पातु दे
वी त्रिपुरभैरवी ॐ पं ह्रीं क्लीं कु
क्षिं पातु देवी मे सर्वसुन्दरी ॐ
फ्रीं श्रीं मे वतात् पार्श्वौ देवी पाता
लवासिनी ॐ ह्रां श्रां क्लीं महाप
याः पृष्ठं देवी मम अम्बिका ॐ ह्रीं हूं
मे वतान्नाभिं देवी श्मशानकालि
का ॐ ह्लौः मे वतात् लिङ्गं देवी श्री
लिङ्गसुन्दरी ॐ सौः क्लीं मे वतान्मे
ढ्रं देवी श्रीभगमालिनी ॐ ह्रां श्री

मेवतात्रुं त्वदेवी मातंगिनी पश्चा ॐ
सौः क्लौं मेवताद्धृद्देवी सर्वाङ्गसु
न्दरी ॐ क्रां फ्रां मेवताज्जानू देवी॰
षट्कोणवासिनी ॐ ह्रीं फ्रां मे॰
वताज्जंघे देवी बिन्दुनिवासिनी
ॐ स्रौः स्त्रौः सदापातु गुल्फौ दे॰
वी गणेश्वरी ॐ ह्रीं पादौ सदापा
तु देवी ब्रह्माण्डचारिणी ॐ ह्रीं
पादादिमूर्धपर्यन्तं पायान्मां जगदी
श्वरी शिरसः पादपर्यन्तं पायान्
मां ह्रीं कुलेश्वरी पूर्वे मां पातु ह्रीं
ज्वाली चाग्नेये मां च ह्रीं शिवा द
क्षिणे ह्रीं च कौमारी नैरृत्ये ह्रीं
च वैष्णवी पश्चिमे नारसिंही मां
वायव्ये मां च चण्डिका उत्तरे ह्रीं
च वाराही ऐशान्यां ह्रीं च शाम्भवी

शा॰
क॰
३

3

ॐ धं ह्रीं मां परा क्लिन्नाऽनन्ता यों ह्रीं प
रात्परा जया ह्रीं मा गतः पातु विज
या १४ तोवतु दुर्गा ह्रीं मां प्रभाते
मात्मस्था ह्रीं शं भरी तथा सायं
ह्रीं रक्षतु नाराछाकं वर्षपि ह्रीं नि
शि अर्धरात्रेपि चामुण्डा निशान्ते
वतु ह्रीं शिवा सर्वदा चैव सर्वत्र पा
यान्मां शिवदूतिका तिष्ठन्तं शीत
लापातु जन्तं स प्रभावतु शान्ता
ह्रीं पातु मेतोयादूति ह्रीं मां ऋतांश
नात् प्रीति ह्रीं पातु मां मायाश्रोरे
भ्यो ह्रीं स्थितिस्तथा मति ह्रीं सर्व
भीतिभ्यो वतान्मां परमेश्वरी रुए
ह्रीं मां करालोक्या दूते मां विकरा
लकः संहारो मां सदा पायादाजन्म
मनि सर्वदा रुरु ह्रीं संकटात्पातु

वमेस्मिं हृदि भीतिश्च महाकालोपि
ंमायान्तस्याधिपः पर्वतेश्च काला
ग्निर्ह्रीं तत्त्वापानपोते सागरमध्यगे
उन्मत्तो ह्रीं सदापानकारायां बन्ध
नाश्रमाम् श्मालंक्रान्तपराधीनंपा
यान्तं मां रक्षतु भैरवः सर्वत्र सर्वदा पा
तु ॐ ह्रीं क्लें सः सरस्वती इतीदं शा
रदाख्याख्यकवचं मन्त्रविग्रहं जग
न्मंगलनामानं सर्वदेवरहस्यकम्
परापररहस्यं च सर्वमन्त्रैकसाधनं
सर्वतेजोमयं ब्रह्मविद्यारूपमनाम
यम् सर्वतत्त्वैकनिलयं सर्वविद्या
विनायकम् ब्रह्मतेजोमयं ब्रह्म
साधनं ब्रह्मवर्चसम् योगदं भोगदं
लोके शारदाया रहस्यकम् यः प
ठेदर्धरात्रे तु शक्तियुक्तो दिगंबरः

श्या॰ क॰ ४
५

नोधयेत्परमेशानीं शारदां पुस्तकान्त
र्गताः तस्मात्साधकराजस्य कर
स्थाः सर्वसिद्धयः रवौ मध्याह्नस
मये लिखि भूर्जे महेश्वरि कुंकुमे
न सचन्द्रेण कस्तूरीचन्दनेन च
मनःशिलादियुक्तेन कवचं त
लिखेत्सुधीः पीतसूत्रेण संवे॰
ष्ट्य सुवर्णेनाथ वेष्टयेत् यो बिभृ
म्करे वक्त्रे कण्ठे वा दक्षिणे भुजे यं
यं कामयते कामं तं तं प्राप्नोति।
लीलया वन्ध्या सन्धारयेद्यदि भ
वेत्पुत्रवती भामिनि सकाले॰
प्राप्नुयात्पुत्रं सर्वशास्त्रपरिपाल॰
कम् कवचं धारयेद्यो हि साय॰
को रणमाविशेत् जित्वा शत्रू
समा[illegible]शत्रुस्तु नः स्वगृहमाविशेत्

इतीदं कवचं दिव्यं शारदाया महेश्व
रि गुह्यं गोप्यतरं गुह्यं सर्वतीर्थफ
लप्रदम् सर्वार्थसाधनं सर्वसंमो
हनमयं शिवे स्तम्भनं मारणं चैव
पठनात्सिध्यते फलम् त्रिवारं यः
पठेद्रात्रौ तस्य राजा वशी भवेत्
शतावर्त्तेण पठेद्यस्तु भक्त्या श्रीमू
र्त्तिसन्निधौ प्रसन्नीभूय तस्याशु
शारदा वरदा भवेत् जपान्ते यस्तु
देवेशि मुक्तकेशो दिगंबरः शक्ति
वक्षस्समासीनः शक्तिमालिंग्य
वा शिवे इदं कवचराजेन्द्रं मंत्ररू
पं च साधकः त्रिवारं च पठेद्धीमा
नामचैतः स्मरान्तरः सश्रीश्चंचल
भवेद्देवि गीर्वाणपंसमस्त्रैलोभम
त्रिलोक्यां विचरेद्वीरो महागणप

शा० क० ९

तिर्थया इतीदं कवचं पुण्यं जगन्मं
गलकाभिधम् शारदायाश्च सर्वं
सुगोपनीयं प्रयत्नेन वत् इति श्री
रुद्रयामले तंत्रे सततविद्याप्रजासं
ग्रहे शारदाजगन्मंगलकवचं।
सम्पूर्णम् शुभम् ॥

शा॰ स॰ ११

ॐ श्रीं गणेशाय नमः ॐ शारदाभवा
न्यै नमः ॐ ह्रां त्रासाकाद्यनिविष्टेना·
ष्टपगतारकाकुंभाशारदामूर्धाच·
न्द्रमसौ शशं यत्तुरथो शास्वं रंचोम·
यम् देवीमाकुरिकां सदेवदयती
ष्टलेन्द्रस्थाननाममालाकुण्डलम्भू
षणावत्नपरामावस्मदाशारदा ।
गंश्रीं क्रों ह्रुं वक्राय नमः ॐ गूं रुद्र
यवक्राय नमः ॐ मूं भुजवक्राय
नमः ॐ मूं गणाधिपतये नमः इ
तिहृदयपूजा ॐ अनन्ताय नमः ॐ
पद्माय नमः ॐ दंध ज्ञानाय नमः
ॐ लं वैराग्याय नमः ॐ हां पद्मा
सनाय नमः ॐ ह्रीं सिंहासनाय न
मः इत्यासनपूजा ॐ ह्रीं श्रीं शार
दाभगवत्यै ह्रीं स्वाहा इति मूलं

ॐ ह्रीं हृदयाय नमः ॐ हूं शिरसे स्वा
हा ॐ हृं शिखायै वषट् ॐ ह्रैं कव
चाय हुं ॐ ह्रौं नेत्रेभ्यो वौषट् ॐ ह्रः
अस्त्राय फट् स्वाहा ॐ नाराचमुद्रा
यै नमः ॐ निःशेषनिर्जरजनप्र
णतांघ्रिपद्मद्वन्द्वाय वारणवरेण्य
मुखाय निर्मम प्रसूजातनयनये
परमोपसर्गदोषाद्युपशमनाय
नमोस्तु तस्मै ॐ सरस्वतीयश्रुत
वाग्भिर्वन्तं वः पद्मासनस्थाय तपद्म
हस्ता त्रैलोक्यमोहस्य विनाशना
य कृतावतारूचरूपया जगत्स्व ॐ
कार्त्तिकेयो महाप्राज्ञः सर्वशास्त्रवि
शारदः प्रणिपत्याब्रवीद्देवं देवं चन्द्रा
र्धशेखरम चन्द्रार्धशेखर स्वामिं
श्चन्द्रकान्तसमुज्ज्वल चन्द्रबिंबस

श्रा॰
स॰
२
2

मानामस्य देवदेव नमोस्तु ते इच्छामि
भुवनस्वामिंस्त्वत्प्रसादादतन्द्रितः
तत्कथ्यतां महादेव यत्के मनसि व
र्तते रहस्यं सर्वदेवानां मया ज्ञातं त्वयि
कुष्ठक किन्तु नाद्याप्यहं वेद्मि दे
वदेवीं सरस्वतीं पंचाननाच्चयादे
वीति समावर्तते त्वया त्रिकालं दे
वदेवेन सर्वश्रेयेन शंभुना तस्याः
स्वरूपं मे नाथ कथ्यतामिन्दुशेखर
कासौ सर्वजगद्वन्द्या किंनाम सा॰
किरुच्यते इति पृष्टो महादेवस्स
र्वाणीमावन्दितः। कथयामास स
तस्य सर्वहिकेतो वृषध्वजः श्रीभग॰
वानुवाच शृणु वत्स महाप्राज्ञ सा
धु पृष्टं त्वया यतः अतस्ते कथयि
ष्यामि स्वरूपां सुरपूजितां यामे।

ज्ञानमयेशक्तियोगिनांध्येयरूपिणी
शब्दब्रह्मात्मिकादेवीसेयंसाक्षात्सर॰
स्वती पंचवक्त्राद्दशभुजासेयंशक्ति
रुत्तमा महासरस्वतीनाम्नासेयं
देवीअवस्थिता याउक्तकपरादेवी
निःसंगाऽदेवताकृतिः स्थापितावत्
सि मयाउक्तकावस्थितासदा पंचा
त्वरीति सादेवी सेयंज्योतिष्मतीम
ता महासरस्वती सैव सैवपंचान
नास्मृता सैवसंसारजननीसैवसं
हारकारिणी साकाराचनिराका
रासैवसर्वमयाकृतिः मस्वमांणय
स्याकश्चिन्नवेत्तिभुवनत्रये तथास्याः
शक्तिरूपायाः प्रमाणंनावबुध्यते
नामकोटिशतंयस्यानित्यमावर्तया
म्यहं ब्रह्माकोटिचतुष्कंचविष्णुको

दिहुंयं तथा वाचस्पतिः पठेत्संचलत्वं
लत्वं पुरन्दरः पठंस्तिवेति विबुधाः सिद्ध
विद्याधरादयः पठन्ति नित्यमस्य ग्रा
नामान्यस्याः स्वशक्तितः तेनेयं लय
मात्रेण निसकल्याणवर्धिनी मता
नां जन्मविध्वंस जरारोगादिवेतंसा
हितायनामसंख्याव्यममालिका प्र
ब्रवीमि ते ।। ——— ॐ नमो भगवत्यै
ॐ महासरस्वती ॥ देवी ॥ महाकन्या ॥ म
हाबला ॥ महाज्योतिष्मती ॥ माता ॥ म
हाज्योतिर्महाकृतिः ॥ महाज्योति ॥
र्विशालाक्षी ॥ महाज्योतिविभूषणा ॥
महात्रैलोक्यजननी ॥ महात्रैलोक्य
धारिणी ॥ महाकारयरायात्री ॥ म॰
हाचन्द्रार्धशेखरा ॥ महाचन्द्रसमा
नास्या ॥ महाचन्द्रकरद्युतिः ॥ महा

वल्लकीनोन्नसा महाचन्द्रद्युतिः ॥ सिता
पारदा शारदांभोग ॥ शुभ्रदेहा ॥ दिना
प्रभा ॥ प्रभातभास्वरा ॥ ज्योतिर्ज्योति
र्ज्वालाकलापिनी ॥ कलालापस्व
ताहंसी ॥ राजहंसैकवासिनी ॥ श्वेत
वाहनसंचारा ॥ वारुसंचारकारिणी ॥
